नत्वे प्रयोजनाभावे। "स्तुत्यानर्थक्यमिति चेत्" कात्या० ७१,८,५, 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" जै०सू०। अनेन क्रियाप्रतिपादकभिन्नवेदभागानामानर्थक्योक्तेः वेदान्तवाक्यानां न स्वार्थे प्रामाण्यं सप्तद्वीपा वसुमतीत्यादिवाक्यवत् तेषां भूतार्थोपदेशकत्वात् तथा च उपासनाविधिविशेषतयैव तेषां प्रामाण्यम् इति मीमांसका मन्यन्ते। तदेतन्मतम् पूर्व्वपक्षत्वेनोपन्यस्य "तत्तु समन्वयादिति" शारीरकसूत्रभाष्ये निराकृतं यथा "यद्यपि शास्त्रप्रमाणकं ब्रह्म तथापि प्रतिपत्तिविधिविषयतयैव शास्त्रेण ब्रह्म समर्प्यते। यथा यूपाहवनीयादीन्यलौकिकान्यपि विधिविशेषतया समर्प्यन्ते तद्वत्। प्रवृत्तिनिवृत्तिप्रयोजनत्वाच्छास्त्रस्य। तथा हि शास्त्रतात्पर्य्यविद आहुः। "दृष्टोहि तस्यार्थः। कर्मावबोधनञ्चोदनेति क्रियायाः प्रवर्त्तकं वचनम्। तस्य ज्ञानमुपदेशः। तद्भूतानां क्रियार्थेन समाम्नायः"। "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामिति च"। अतः पुरुषं क्वचिद्विषयविशेषे प्रवर्त्तयत् कुतश्चिद्विषयविशेषान्निवर्त्तयच्चार्थवच्छास्त्रम् तच्छेषतया चान्यदुपयुक्तम्। तत्सामान्याद्वेदान्तानामपि तथैवार्थवत्त्वं स्यात्। सति च विधिपरत्वे यथा स्वर्गादिकामस्याग्निहोत्रादि साधनं विधीयते एवममृतत्वकामस्य ब्रह्मज्ञानं विधीयत इति युक्तम्। नन्विह जिज्ञास्यवैलक्षण्यमुक्तम्। कर्मकाण्डे भव्योधर्मोजिज्ञास्यः इह तु भूतं नित्यवृत्तं ब्रह्म जिज्ञास्यमिति। तत्र धर्म्मज्ञानफलादनुष्ठानापेक्षाद्विलक्षणं ब्रह्मज्ञानफलं भवितुमर्हति। नार्हत्येवं भवितुम्। कार्यविधिप्रयुक्तस्यैव ब्रह्मणः प्रतिपाद्यमानत्वात्। "आत्मा वा अरे द्रष्टव्यः" "योऽयमात्माऽपहतपाप्मा सोऽन्वेष्टव्यः स विजिज्ञासितव्यः"। "आत्मेत्येवोपासीत"। "आत्मानमेव लोकमुपासीत" "ब्रह्म वेद ब्रह्मैव भवति" इत्यादिषु हि विधानेषु सत्सु कोऽसावात्मा ब्रह्मेत्याकाङ्क्षायां तत्स्वरूपसमर्पणेन सर्वे वेदान्ता उपयुक्ताः नित्यः सर्वज्ञः सर्व्वगतोनित्यतृप्तोनित्यशुद्धबुद्धमुक्तस्वभावोविज्ञानानन्दं ब्रह्मेत्येवमादयः। तदुपासनाच्च शास्त्रदृष्टोऽदृष्टोमोक्षः फलं भविष्यति। कर्त्तव्यविध्यननुप्रवेशेन वस्तुमात्रकथने हानोपादानासम्भवात् "सप्तद्वीपा वसुमती" "राजासौ गच्छति" इत्यादि वाक्यवद्वेदान्तवाक्यानामानर्थक्यमेव स्यात्। ननु वस्तुमात्रकथनेऽपि रज्जुरियं सर्प इत्यादौ भ्रान्तिजनितभीतिनिवर्त्तनेनार्थवत्त्वं दृष्टं तथेहाप्यसंसार्य्यात्मवस्तुकथनेन संसारित्वभ्रान्तिनिवर्त्तनेनार्थवत्त्वं स्यात्। स्यादेवं यदि रज्जुस्वरूपश्रवणइव सर्पभ्रान्तिः संसारित्वभ्रान्तिर्ब्रह्मस्वरूपश्रवणमात्रेण निवर्त्तते श्रुतब्रह्मणोऽपि यथापूर्व्वं सुखदुःखादिसंसारित्वधर्मदर्शनात्। "श्रोतव्योमन्तव्योनिदिध्यासितव्यः" इति च श्रवणोत्तरकालयोर्मनननिदिध्यासनयोर्दर्शनात्। तस्मात्प्रतिपत्तिविधिविषयतयैव शास्त्रप्रमाणकं ब्रह्माऽभ्युपगन्तव्यमिति"(पूर्व्वपक्षः)। "यदपि शास्त्रतात्पर्य्यविदामनुक्रमणम्। दृष्टोहि तस्यार्थः कर्म्मावबोधनमित्येवमादि। तत् धर्मजिज्ञासाविषयत्वाद्विधिप्रतिषेधशास्त्राभिप्रायं द्रष्टव्यम्। अपि च "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" इत्येतदेकान्तेनाभ्युगच्छतां भूतोपदेशानामानर्थक्यप्रसङ्गः। प्रवृत्तिनिवृत्तिव्यतिरेकेण भूतञ्चेत् वस्तूपदिशति भव्यार्थत्वेन, कूटस्थं नित्यं भूतं नोपदिशतीत्यत्र कोहेतुः?। न हि भूतमुपदिश्यमानं क्रिया भवति। अक्रियात्वेपि भूतस्य क्रियासाधनत्वात् क्रियार्थएव भूतोपदेश इति चेन्नैष दोषः। क्रियार्थत्वेऽपि क्रियानिर्वर्त्तनशक्तिमद्वस्तूपदिष्टमेव। क्रियार्थत्वन्तु प्रयोजनं तस्य, न चैतावता वस्त्वनुपदिष्टं भवति। यदि नामोपदिष्टं किं तव तेन स्यादिति उच्यते। अनवगतात्मवस्तूपदेशश्च तथैव भवितुमर्हति। तदवगत्या मिथ्याज्ञानस्य संसारहेतोर्निवृत्तिः प्रयोजनं क्रियतइत्यविशिष्टमर्थवत्त्वं क्रियासाधनवस्तूपदेशेन। अपि च "ब्राह्मणोन हन्तव्यः" इति चैवमाद्या निवृत्तिरुपदिश्यते। न च सा क्रिया नापि क्रियासाधनम्। अक्रियार्थानामुपदेशोऽनर्थकश्चेत् "ब्राह्मणोन हन्तव्यः" इत्यादिनिवृत्त्युपदेशानामानर्थक्यं प्राप्तं तच्चानिष्टम्। न च स्वभावप्राप्तहन्त्यर्थानुरागेण नञः शक्यमप्राप्तक्रियार्थत्वं कल्पयितुं हननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण। नञश्चैष स्वभावोयत् स्वसम्बन्धिनोऽभावं बोधयति। अभावबुद्धिश्चौदासीन्यकारणम्। सा च दग्धेन्धनाग्निवत् स्वयमेवोपशाम्यति। तस्मात्प्रसक्तक्रियानिवृत्त्यौदासीन्यमेव ब्राह्मणोनहन्तव्य इत्यादिषु प्रतिषेधार्थं मन्यामहे अन्यत्र प्रजापतिव्रतादिभ्यः। तस्मात् पुरुषार्थानुपयोग्युपाख्यानादिभूतार्थवादविषयमानर्थक्याभिधानं द्रष्टव्यम्" भा०। (सिद्धान्तः) वाक्यादेः २ अर्थबोधकताभावे च। मीमांसकमते कार्य्यान्वित एव शब्दानां शक्तिग्रहनियमात् लिङादेश्च कार्य्यताबोधकतया तच्छून्यवाक्यस्यार्थबोधकत्वाभाव इति प्राभाकरामन्यन्ते।

आनव त्रि० अनिति अन-उण् आनुः प्राणी तस्येदम् अण्।